# ॥ श्री मुख्यप्राणाष्टकम् ॥

भक्तिं श्रीरमणस्य पादयुगले प्रीत्या प्रदेहीश म-
च्चित्तं तत्पदपद्मचिन्तनरतं नित्यं विधेह्यच्युतम् ।
त्वत्तातं मयि सुप्रसन्नमधुना विज्ञाप्य कुर्वञ्जसा
स्वामिन् प्राणगणाधिनाथ दयया दासं हि मां पालय ॥ १ ॥

त्वय्युत्तिष्ठति यत्कलेवरमभूत्पातैकपात्रं सुरा-
स्त्रातुं नैव हि शेकुरादिपुरुषोऽप्यासीदुपेक्षारतः ।
श्वासाख्यं मनुमस्य यत्तव वशं ब्रूतेऽविगीता श्रुतिः
स त्वं प्राणगणाधिनाथ दयया दासं हि मां पालय ॥ २ ॥

येनाऽऽत्मीयजनावनाय बलिना नीतः पुरोच्चाचल-
स्तीर्णः पूर्णपयोनिधिः खलहृता दृष्टा च सीताकृतिः ।
तत्ते किं कथनीयमस्ति जगति व्यक्तस्य सत्पालने
स्वामिन् रामपदाब्जभृङ्ग तदव श्रीमन्हनूमन्नमः ॥ ३ ॥

सेवाभिः परितुष्टधीः कविजनैर्गेयाभिराद्यः पुमान्
ब्रह्माणं किल भाविनं समतनोत्सन्तं भवन्तं प्रभुः ।
साम्राज्ये सति विस्मृतिर्निजजने निंद्या हि यत्त्वादृशां
स्वामिन् रामपदाब्जभृङ्ग तदव श्रीमन्हनूमन्नमः ॥ ४ ॥

कामी येन हि कीचको विनिहतः क्रोधी च दुश्यासनः
स्तब्धो लुब्धसुयोधनश्च मणिमान्मुग्धो मदान्धो बकः ।
कृष्ण्येर्ष्याभिरतश्च मागधपतिः षड्वैरिवर्गात्सदा
स त्वं भीम गुणाभिराम दयया दासं हि मामुद्धर ॥ ५ ॥

दाहाद्येन विमोचितो निजजनस्स त्वं भवाग्नेरव
स्वीयाध्वप्रतिबन्धकश्च निहतः किर्मीरनामा रणे ।
प्रोद्यन्मध्वमताध्वगस्य सदय प्रत्यर्थिनस्सादय
स्वामिन्सोमकुलाग्रगण्य भवतः पोतं हि मां न त्यज ॥ ६ ॥

विद्वत्सिन्धुम गृहोदय द्विजपथप्रज्ञप्तिबीजोदय
प्रत्यर्थ्यम्बुजमुद्रण प्रियजनप्रत्यूहघर्मार्दन ।
हृल्लग्नामलकृष्णसस्मितदयावीक्षासुधाधिष्ण्य मां
श्रीमन्मध्वमुनीन्द्रचन्द्र कुमुदस्थानीयमुद्बोधय ॥ ७ ॥

यद्वागाख्यकराः सतां सुखकराः दुर्वादिगर्वज्वराः
सद्विद्याम्बुधिपोषको यदुदयोऽविद्याम्बुधेः शोषकः ।
यः शर्वेण शिरोधृतोऽपि विशदं चक्रे मुरारेः पदं
सोऽव्यादद्भुतमध्वतारकपतिर्हार्दान्धकारच्युतिः ॥ ८ ॥

पद्यानामिदमष्टकं प्रविलसन्मध्वाकृतिस्पष्टकं
तद्दासप्रियवादिराजयतिना तद्दत्तवाग्भूतिना ।
हृद्यं यः पठतीरितं सुचरितं सः स्याद्दिशामष्टके
माद्यन्मायिमतङ्गभङ्गकरणे सिंहप्रबर्हप्रभः ॥ ९ ॥

॥ इति श्रीमद्वादिराजपूज्यचरणविरचितं मुख्यप्राणाष्टकं सम्पूर्णम् ॥